This question paper contains 8+2 printed pages]

*Your Roll No.*...............

**1603**

**B.A. (Hons.)/I (New Course)** **D**

SANSKRIT—Paper II

(Prose)

*Time : 3 Hours* *Maximum Marks : 75*

*(Write your Roll No. on the top immediately on receipt of this question paper.)*

*Note* :— Unless otherwise required in a question, answers should be written in Sanskrit *or* in Hindi *or* in English; but the same medium should be used throughout the paper.

**टिप्पणी:**— अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर संस्कृत **या** हिंदी **या** अंग्रेजी किसी एक भाषा में दीजिए; परन्तु **सभी** उत्तरों का माध्यम एक ही होना चाहिए।

*All* questions are compulsory.

**सभी** प्रश्नों के उत्तर अनिवार्य हैं।

P.T.O.

1. निम्नलिखित का सप्रसंग अनुवाद कीजिए :

Translate the following with reference to the context : 6×4=24

(क) अधीष्व तावद्दण्डनीतिम् इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता। स 'तथा' इत्यधीते शृणोति च। तत्रैव जरां गच्छति। तत्तु किल शास्त्रं शास्त्रान्तरानुबन्धि। सर्वमेव वाङ्मयमविदित्वा न तत्त्वतोऽधिगम्यते। भवतु कालेन बहुनाल्पेन वा तदर्थाधिगतिः। अधिगतशास्त्रेण चादावेव पुत्रदारमपि न विश्वास्यम्। आत्मकुक्षेरपि कृते तण्डुलैरियद्भिरियानोदनः सम्पद्यते। इयत ओदनस्य पाकायैतावदिन्धनं पर्याप्तमिति मानोन्मानपूर्वकं देयम्।

**अथवा**

*(Or)*

एवमिन्द्रियाणि जेतव्यानि, एवमरिषड्वर्गस्त्याज्यः सामादिरुपायवर्गः स्वेषु परेषु चाजस्रं प्रयोज्यः

सन्धिविग्रहचिन्तयैव नेयः कालः, स्वल्पोऽपि सुखस्यावकाशो न देयः इति तैरप्येभिर्मन्त्रिबकैर्युष्मत्तश्चौर्यार्जितं धनं दासीगृहेष्वेव भुज्यते। येऽपि मन्त्रकर्कशास्तन्त्रकर्तारः शुक्राङ्गिरसविशालाक्षबाहुदन्तिपुत्रपराशरप्रभृतयस्तैः किमरिषड्वर्गो जितः, कृतं वा तैः शास्त्रानुष्ठानम् ?

(ख) केवलं च निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टमनंजनवर्तिसाध्यमपरमैश्वर्यतिमिरान्धत्वम्। अशिशिरोपचारहार्योऽतितीव्रोदर्पदाहज्वरोष्मा। सततमूलमन्त्रशम्यो विषयविषास्वादमोहः। नित्यमस्नानशौचवध्यो बलवान् रागमलावलेपः।

अथवा

(*Or*)

मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः। पूजयन्ति द्विजातीन्। न मानयन्ति मान्यान् नार्चयन्त्यर्चनीयान्। नाभिवादयन्त्यभिवादार्हान्। नाभ्युत्तिष्ठन्ति गुरून्। अनर्थकायासान्तरितविषयोपभोगसुखमित्यहसन्ति विद्वज्जनम्। जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम्। आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय। कुप्यन्ति हितवादिने। सर्वथा तमभिनन्दन्ति योऽहर्निशमनवरत-मुपरचितांजलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति।

(ग) वत्स गौरसिंह! अहमत्यन्तं तुष्यामि त्वयि। यावत्त्वमेकाक्यपजलखानस्य त्रीनश्वान् दासीकृतवान् अथ च ब्राह्मणतनयांश्च मोचयित्वाऽऽनीतवानसि। कथं न भवेरीदृशः ? कुलमेवेदृशं राजपुत्रदेशीयक्षत्रियामाण्। तावत्पुनरश्रूयत मर्मरः

पादक्षेपश्च। ततो विरम्य मुनिः स्वयमुत्थाय प्रोच्चं शिलापीठमेकमारुह्य निपुणतया परितः पश्यन्नपि कारणं किमपि नावलोकयामास चरणाक्षेपशब्दस्य।

**अथवा**

(*Or*)

भगवन्! बद्धसिद्धासनैर्निरुद्धनिश्वासैः प्रबोधितकुण्ड-लिनीकैर्विजितदशेन्द्रियैरनाहतनादतन्तुमवलम्ब्याज्ञाचक्रं संस्पृश्य, चन्द्रमण्डलं भित्वा, तेजःपुंजमविगणय्य, सहस्रदलकमलस्यान्तः प्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युंजयैरानन्द-मात्रस्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः। तस्मिन् समये भवता ये पुरुषा अवलोकितास्तेषां पंचाशत्तमोऽपि पुरुषो नावलोक्यते।

(घ) तस्यां च मगधेषु चार्वाकमतमिवाद्वितीयप्रमाणं, पुष्करद्वीपमिव स्वादूदकमध्यगतं, रिपुपुरमिव विशालं, साहित्यशास्त्रमिव बहुविधध्वनिविचारसहितं केनचन वीरेणेवोल्लसितमारकतेन गृहगणेन राजमानं जीवन्मुक्तहृदयमिव संसरणसंकटसहितं, जलमिव सर्वतोमुखं विष्णुपदमिव व्याप्तभूतलं पुष्पपुरं नाम नगरमासीत्।

**अथवा**

(*Or*)

तत्र चान्तराश्रितानेकभूभृत् सहस्रविपक्षबलसागराचमन-कुम्भसम्भवायमानदोः स्तम्भः, अग्रणीर्गुणशालिनां ललाम कलावतां, प्रवीरः प्रवीणानामसाधारणो धारणावद्बुद्धीनां, धुरीणो धीराणां मान्यो वदान्यानां, निधानं दिशोदण्डस्य, मत्तः परवधे, तृष्णक् धर्मे, क्रुद्धो दुर्विनीतेषु, मूढो दुर्नये, दिग्वधूकर्णावतंसायमानयशःपल्लवो राजा राजशेखरो नाम रराज।

2. (क) प्रश्न संख्या 1 के किन्हीं **पाँच** रेखाङ्कित पदों पर व्याकरणात्मक टिप्पणियाँ लिखिए। 5

Write grammatical notes on any *five* of the underlined words in Question No. **1**.

(ख) निम्नलिखित में से किन्हीं **पाँच** पर संक्षिप्त टिप्पणियाँ लिखिए : 10

Write short notes on any *five* of the following :

चार्वाक, अमरावती, कुसुमशर, क्षीरसागर, गायत्री, सन्ध्योपासना, नालीजंघ, माहिष्मती।

3. दण्डी की शैली का विवेचन कीजिए।

Critically analyze the style of Dandin. 8

अथवा

(*Or*)

'विश्रुतचरितम्' के आधार पर विहारभद्र का चरित्र-चित्रण कीजिए।

Draw a character sketch of विहारभद्र on the basis of 'Vishrutacharitam'.

4. 'पंचाननो बाण:' पर टिप्पणी कीजिए। 8

Comment on 'पंचाननो बाण':।

अथवा

(*Or*)

शुकनासोपदेश के अनुसार युवावस्था के दोषों को चिह्नित कीजिए।

According to शुकनासोपदेश, underline the demerits of youthfulness.

5. 'शिवराजविजयम्' में वर्णित शिवाजी का चरित्र-चित्रण कीजिए।

Sketch the character of Shivaji, as described in 'शिवराजविजयम्'। 8

**अथवा**

(*Or*)

अंबिकादत्त व्यासजी के जीवन एवं कृतित्व पर एक निबन्ध लिखिये।

Write an essay on the life and works of Ambikadatta Vyas.

6. 'मन्दारमंजरी' के आधार पर पूर्व दिशा का वर्णन कीजिए।

Describe eastern quarter on the basis of 'Mandar Manjari.' 7

**अथवा**

(*Or*)

मन्दारमंजरी' की शैली पर टिप्पणी कीजिए।

Comment on the style of 'Mandar Manjari.'

7. संस्कृत में उत्तर दीजिए : 5

Answer in Sanskrit :

(क) कस्य राज्याभिषेकः उपस्थितः ?

(ख) का आसीत् मलयवती ?

(ग) विश्रुतचरितस्य नायकः कः ?

(घ) पुण्यवर्मा कस्य देशस्य राजा आसीत् ?

(ङ) शुकनासः कम् उपदिष्टवान् ?